Postal Regd.No. GAMC- 1553/2025-2027

ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : २० अङ्क : २३२
ऑगष्ट - २०२५

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### यथा धर्मः तथा प्रजाः



जगति नैके धर्माः विद्यन्ते। अत्र वयं धर्मस्य अर्थं पारम्परीणं वर्तनशास्त्रं कर्तुं शक्नुमः। धर्मे धर्मे नियमेषु भिन्नता दृश्यते। तथापि बहुत्र तात्त्विकी समानता तु दृष्टिगोचरा भवति एव। ख्रिस्तधर्मे नम्रता करुणा च शासनं कुरुतः, न तु युद्धम्। मुस्लिमधर्मे धर्मप्रसारार्थं क्रियमाणं युद्धं पुण्यप्रदं मन्यते। हिन्दुधर्मः मध्यममार्गं स्वीकरोति। नाशं प्रति गच्छन्तं धर्मं रक्षितुं युद्धम् अनिवार्यतया कर्तव्यम् इति हिन्दुधर्मस्य चिन्तनं वर्तते। अतः एव श्रीकृष्णः अर्जुनं युद्धे कथञ्चित् योजयति। तथापि युद्धात् पूर्वं शान्त्यर्थम् अपि प्रयत्नः कर्तव्यः इति महाभारतीयः विचारविशेषः। तत्रापि आपतिते युद्धे, निर्भयतया पूर्णतः विजयप्राप्तिः अपि हिन्दुधर्मस्य लक्षणम्। आत्मरक्षणाय धर्मरक्षणाय वा क्रियमाणं युद्धं हिन्दुधर्मः 'यदृच्छया चोपपन्नं स्वर्गद्वारम् अपावृतम्' मन्यते। एतदेव तत्त्वं बाईबलग्रन्थे अपि दृश्यते।

हिन्दुप्रजाः आत्मरक्षणार्थं प्रयत्नं कुर्वन्ति, परन्तु अत्र वैरबुद्धिः नास्ति। मुस्लिमधर्मे अपि वैरवृत्तेः अभावः दृश्यते। अतः एव हिन्दुमुस्लिमयोः दीर्घकालात् अनन्तरम् अपि ऐक्यस्य सम्भावनां कल्पयितुं वयं शक्नुमः। अद्य भारतस्य सर्वैः मुस्लिमराष्ट्रैः सह यत् ऐक्यं दृश्यते तदपि नूतनस्य सूर्योदयस्य सम्भावनां सूचयति। पाकिस्थानम् अपि स्वयं यथानुभवं भारतेन सह मैत्रीं करिष्यति। यतो हि पाकिस्थानस्य विकासे भारतदेशः एव साहाय्यं कर्तुं समर्थः अस्ति।

ख्रिस्तधर्मः अर्थप्रधानः अस्ति। अर्थेन अन्धीभूताः प्रजाः संस्कृतितः किञ्चित् दूरं गताः इति सत्यम्। तथापि ताभिः प्रजाभिः अर्थशक्तेः चमत्कारः प्रदर्शितः इत्यपि सत्यमेव। आधुनिकविज्ञानं प्रति गहनं चिन्तनम् अपि तासाम् अपरः गुणः। परन्तु हिन्दुमुस्लिमयोः आर्थिकः पक्षः किञ्चित् शिथिलः इव प्रतिभाति। धर्मं प्रति निर्विचारं धावनेन अपि उचितः आर्थिकः विकासः संरुध्यते इति चिन्तनम् अत्र न अभवत्। वस्तुतः जीवनं परिपूर्णं द्रष्टुम् अभिलाषः अस्ति चेत् पारमार्थिकम् ऐहिकं च कल्याणं युगपत् साधनीयं भवति। श्रीवेदव्यासेन उक्तम् – 'धर्मार्थकामाः सममेव सेव्याः।'

## लालश्रेष्ठिना प्रार्थितः वरः



पूर्वं वाराणसीनगरे लालश्रेष्ठी नाम कश्चन धनिकः निवसति स्म। एका वराटिका अपि न कस्मैचित् दीयते स्म तेन।

तस्य पत्न्याः नाम मङ्गूबायी इति। तीर्थयात्रा करणीया इति कदाचित् तस्याः मनसि इच्छा उत्पन्ना। सा स्वस्य इच्छां पतिम् उक्तवती। तत् श्रुत्वा लालश्रेष्ठी कोपेन अवदत् – ''अहो! कीदृशी मूर्खता भवत्याः! किं भवती शिवस्य अपमाननं कर्तुम् इच्छति? शिवः एतस्याः वाराणस्याः अधिदेवता। तस्य दर्शनाय सहस्रशः जनाः प्रतिदिनं दूरदेशेभ्यः आगच्छन्ति। एवं स्थिते अत्रत्याः वयं यदि अन्यत्र गच्छेम तर्हि किं शिवस्य कोपः न भवेत्?'' इति।

'एषः धनं व्ययीकर्तुम् अनिच्छन् एवं वदन् अस्ति' इति जानती मङ्गूबायी मौनम् आश्रितवती। शिवरात्रिः आगता। तद्दिने गङ्गानद्यां स्नानं पुण्यप्रदम् इति जनानां विश्वासः। अतः मङ्गूबायी पतिम् उक्तवती – ''आवां गङ्गानद्यां स्नानं कृत्वा आगच्छाव'' इति।

''अये मूर्खे! अद्य स्नानघट्टे अर्चकानां महापीडा भविष्यति इति किं भवत्या न ज्ञायते? पूजां कारयामः इति वदन्तः ते अस्मत्तः प्रभूतं धनं स्वीकुर्वन्ति। अतः अद्य तत्र न गन्तव्यम्'' इति अवदत् लालश्रेष्ठी।

किन्तु मङ्गूबायी स्वस्य अपेक्षां त्यक्तुं न सिद्धा। अन्ते, यत्र कोऽपि अर्चकः आगत्य न पीडयेत् तादृशे एकान्तस्थले स्नानं करणीयम् इति नियमं विधाय लालश्रेष्ठी पत्न्या सह स्नानार्थं प्रस्थितः। जनरहितस्य स्थलस्य अन्वेषणाय ताभ्यां यत्नः आरब्धः।

भगवान् शिवः, देवी पार्वती च अदृश्यरूपेण सञ्चरन्तौ भक्तानां व्यवहारं परिशीलयन्तौ आस्ताम्। तदवसरे पार्वती शिवं पृष्टवती ''एतावन्तः भक्ताः भवति भक्तिं वहन्ति। किमर्थं भवता एतेषाम् इच्छा न पूर्यते?'' इति।

''एते तीव्रेच्छावन्तः न। एते सम्प्रदाय-मात्रस्य अनुसर्तारः'' इति अवदत् शिवः।

एतदवसरे एव लालश्रेष्ठि-तत्पत्न्योः उपरि पार्वत्याः दृष्टिः पतिता। ''तत्र पश्यतु। यत्र भवतः ध्यानस्य भङ्गः न भवेत् तादृशं प्रशस्तं स्थलम् अन्विष्यन्तौ स्तः तौ। किम् एतौ अपि अन्ये इव एव इति चिन्तयति भवान्?'' इति अपृच्छत् पार्वती।

शिवस्य मन्दहासः एव उत्तरम् आसीत्। ततः तौ अर्चकवेषं धृत्वा लालश्रेष्ठिसमीपं गतवन्तौ। अर्चकं दृष्ट्वा लालश्रेष्ठी क्रोधेन अवदत् – ''अहं भवतः साहाय्यं न इच्छामि। मम निमित्तं कोऽपि मन्त्रः भवता उच्चारणीयः नास्ति।''

''अलं क्रोधेन। भवता साङ्केतिकरूपेण अल्पं धनं दत्तं चेत् पर्याप्तम्। अधिकधनस्य इच्छा नास्ति मम'' इति अवदत् शिवः।

''किञ्चित् धनं दत्त्वा पूजां कारयाम'' इति अवदत् मङ्गूबायी अपि। ''अस्तु। अहं पैसामात्रं ददामि, न

ततोऽपि अधिकम्'' इति अवदत् श्रेष्ठी।

''भवतु नाम'' इति अवदत् शिवः। लालश्रेष्ठी तत्पत्नी च स्नानं कृतवन्तौ। मन्त्रम् उच्चार्य हस्तम् उन्नीय आशीर्वादं कृत्वा शिवः अवदत् – ''धनं दीयताम् इति।''

''अत्रैव धनं दीयते इति तु मया न उक्तम्। मया अत्र आगमनसमये धनं न आनीतम् एव'' इति अवदत् लालश्रेष्ठी। ''किं तेन ? अहं भवता सह भवद्गृहम् एव आगमिष्यामि'' इति अवदत् शिवः। ततः लालश्रेष्ठिना तत्पत्न्या च सह शिवः गतवान्।

गृहं गतः श्रेष्ठी हस्तपादं प्रक्षाल्य वस्त्रान्तरं धृत्वा बहिः आगत्य अवदत् – ''अद्य धनं नास्ति मम गृहे। अग्रे कदाचित् दास्यते'' इति।

''श्वः आगमिष्यामि'' इति उक्त्वा निर्गतः शिवः अनन्तरदिने पुनः श्रेष्ठिनः गृहम् आगतवान्। श्रेष्ठी कमपि व्याजम् उक्त्वा अर्चकरूपिणं शिवं प्रतिप्रेषितवान्। एवमेव बहुवारं प्रवृत्तम्। शिवः प्रतिदिनं श्रेष्ठिनः गृहम् आगत्य धनं याचति स्म प्रत्येकस्मिन्नपि दिने श्रेष्ठी कमपि व्याजं वदति स्म।

'प्रतिदिनम् अपि धनदानं निराक्रियते चेत् अर्चकः खिन्नः सन् आगमनं परित्यजेत्' इति श्रेष्ठिनः चिन्तनम् आसीत्। किन्तु शिवः कदाचिदपि आगमनं न परित्यक्तवान्। 'कथमपि एषः निवारणीयः' इति श्रेष्ठिनः चिन्तनम्। अतः एकस्मिन् दिने सः पत्नीम् अवदत् ''अद्य यदा अर्चकः आगमिष्यति तदा भवती तं वदतु यत् मम पतिः दिवं गतः'' इति। मङ्गूबायी अनिच्छन्ती अपि पत्युः आदेशं पालितवती।

''अहो ! महतः विषादस्य विषयः अयम्। वत्से ! भवत्याः पतिः धनव्ययं सर्वथा न इच्छति स्म। अतः एतस्य शवम् अहम् एव नदीघट्टं नेष्यामि, येन धनव्ययः निवारितः भवेत्। उत्तरक्रियार्थं धनव्ययः न जातः इत्येतत् दृष्ट्वा तदीयः आत्मा तृप्तः भवेत्'' इति अवदत् शिवः।

ततः प्रकोष्ठे शवः इव शयितवन्तं श्रेष्ठिनम् उन्नीय नदीतीरं प्रति प्रस्थितवान् शिवः। 'इदानीं मम कार्यतन्त्रं यदि अहं न परिवर्तयेयं तर्हि एषः मां नद्यां क्षेप्स्यति एव' इति विचिन्त्य श्रेष्ठी अर्चकस्य स्कन्धात् झटिति अवतीर्णवान्। भूमौ स्थित्वा सः अवदत् – ''अहं मृतः आसम्। किन्तु पुण्यपुरुषस्य भवतः स्पर्शात् अहम् उज्जीवितः। धन्यः अस्मि। धन्योऽहम्'' इति।

भगवान् शिवः तु सर्वं जानाति स्म एव। सः स्वस्य वास्तविकं रूपं दर्शयन् अवदत् –''वत्स। सम्पत्तेः रक्षणविषये भवता या विशेषास्था दर्श्यते सा एव आध्यात्मिकजीवने दर्शनीया भवता। तदस्तु, भवद्विषये सुप्रीतः अस्मि। कमपि वरं याचतु'' इति।

तदा करौ योजयित्वा श्रेष्ठी अवदत् – ''देव ! पैसात्मकं धनं मया दातव्यं यथा न स्यात् तथा वरेण अनुगृह्णातु'' इति। विषादपूर्णः हासः शिवस्य मुखे उद्भूतः। अदृश्यरूपेण स्थितां पार्वतीं भावगर्भितदृष्ट्या दृष्ट्वा श्रेष्ठिनम् उद्दिश्य – ''तथास्तु'' इति उक्त्वा ततः अदृश्यः अभवत् सः।

देव्याः पार्वत्याः मुखं खेदेन म्लानम् आसीत्। शिवः ताम् अवदत् – ''यत् भक्तेन न प्रार्थितं तत् दातुं न अर्हामः वयम्। यावत् याचितरि विवेकः न उद्भवेत् तावत् किमपि कर्तुं न शक्नुमः, ऋते प्रतीक्षायाः'' इति।

## प्रतिज्ञायौगन्धरायणम् ( ग्रन्थपरिचयः )

व्योम शाहः

अनुवर्तते

द्वितीयाङ्कस्य विष्कम्भकेन इदं ज्ञाप्यते यद् दिने दिने दूताः महासेनाय समागच्छन्ति। कञ्चुकीयः तान् निवेश्य सत्कारं करोति स्म। सः चिन्तितः यद् राजा महासेनः न कस्मैचिद् अपि प्रतिवचनं ददाति, न च अनुग्रहं करोति। अत्र कन्यानुप्रदानविषये राजा निर्णयं त्यक्त्वा दैवं तत्कार्यार्थम् अधिकृतवान् इति चिन्तयति कञ्चुकीयः। अङ्कस्य प्रारम्भे महाराजः महासेनः सपरिवारं प्रविशति। दिने दिने पार्श्वस्थेभ्यः राज्येभ्यः कन्यायाः अनुप्रदानार्थं दूतसम्प्रेषणानि भवन्ति। अद्य काशिराजस्य आर्यजैवन्तिः दौत्येन समागतः। कञ्चुकीयादयः तं यथार्हं सत्कर्तुम् आज्ञापयति। राजा महासेनः आगतेभ्यः दूतेभ्य कदाऽपि उत्तरं न प्रयच्छति स्म। कञ्चुकीयेन पृष्टे सः कारणं कथयति यत् ''अतिलोभाद् वरगुणानाम् अतिस्नेहात् च वासवदत्तायां न शक्नोमि निश्चयं गन्तुम्।'' गुणान् वर्णयन् सः श्लोकं ब्रवीति—

**कुलं तावच्छ्लाघ्यं प्रथममभिकाङ्क्षे हि मनसा ततः सानुक्रोशं मृदुरपि गुणो ह्येष बलवान्।**
**ततो रूपे कान्तिं न खलु गुणतः स्त्रीजनभयात् ततो वीर्योदग्रं न हि न परिपाल्या युवतयः॥**

महासेनाद् अन्यत्र इमे गुणाः इदानीं न क्वचिदपि प्राप्यन्ते इति कञ्चुकीयः प्रतिवदति। ततः प्रविशति वासवदत्तायाः माता। वासवदत्ता तु वैताल्याः सकाशे नारदीयां वीणां शिक्षितुं गता अधिकं च शिक्षितुम् आचार्यम् इच्छति इति सा राज्ञे निवदयति। राजा कथयति यत् वासवदत्ता-विवाह-विषये निश्चयं कर्तुं सः न समर्थः। तत्र मातॄणां वेदनां प्रकटीकुर्वन् सः आह— **अदत्तेत्यागता लज्जा दत्तेति व्यथितं मनः। धर्मस्नेहान्तरे न्यस्ता दुःखिताः खलु मातरः॥**

काशिराजतः आर्यजैवन्तेः आगमनेन राजा विलोभितः। यावता स स्वीयां व्यथां देव्यै निवेदयति, तावता एव सहसा कञ्चुकीयः प्रविष्टः। शालङ्कायनेन कृतं वत्सराजस्य निग्रहं श्रुत्वा राजा नितरां चकितः। सः पुनःपौन्येन पुष्ट्यर्थम् अपृच्छत्। तथाऽपि सः श्रद्धां न करोति—

**न श्रद्दधाम्युदयनग्रहणं त्वयोक्तं व्यावर्तनं करतलैरिव मन्दरस्य।**
**यस्याहवेषु रिपवः कथयन्ति शौर्यं यौगन्धरायणमतानि च नः स्वनन्ति॥**

ततः कञ्चुकीयः सशालङ्कायनं वत्सराजं भद्रद्वारेण प्रवेशयति। महासेनः अत्यन्तम् आनन्दितः। देवी पृच्छति यद् अनेन (वत्सराजेन) न जातुचिदपि दूतः प्रेषितः, तर्हि किमर्थं राजा हर्षमनुभवति ? राजा तस्य पुरतो आत्मनो न्यूनत्वं दर्शयति। शालङ्कायनेन वत्सराजस्य घोषवती वीणा द्रष्टुं राज्ञे प्रषिता। राजा तामेव उपहारीकृत्य वासवदत्तायै प्रेषयति। युद्धवशात् व्रणिनं वत्सराजस्य परिकर्मार्थं मणिभूमिकायां च प्रवेशयितुम् आज्ञापयति। अमात्याय भरतरोहकाय वत्सराजस्य सत्कारः न रोचते इति विज्ञाय राजा स्वयं वत्सराजेन मेलितुं निर्गच्छति। अनेन द्वितीयाङ्कस्य समाप्तिः भवति। नाटकेऽस्मिन् तृतीयः अङ्कः मुख्यः। विदूषकः यौगन्धरायणः रुमण्वान् च प्रच्छन्नवेषधारिणः उज्जयिन्यां तिष्ठन्ति। केचिद् अन्येऽपि परिचिताः सहाय्यार्थम् उज्जयिन्यां नगर्याम् आगताः प्रच्छन्नवेषेण तिष्ठन्ति। तैः एकः प्रपञ्चः निश्चितः। तत्र कस्यांचिद् हस्तिन्याम् उन्मत्तीभूते राजा तां शमयितुम् उदयनस्य साहाय्यं स्वीकरिष्यति। ततः ताम् एव आरुह्य ते राजधानीं गमिष्यन्ति। तत्र डिण्डिभवेषधारी विदूषकः उन्मत्तकं (यौगन्धरायणं) गूढया भाषया प्रपञ्चे परिवर्तनस्य आवश्यकतां प्रकटीकरोति, किन्तु सः न अवगच्छति। तदैव श्रमणकवेषधारी रुमण्वान् प्रविशति। सर्वेऽपि अग्निगृहं प्रविशन्ति। विदूषकः कथयति यत् सः स्वामिना मिलितवान्। यदा यौदन्धरायणः समस्तमपि प्रयोगं वत्सराजाय निवेदयितुं कथयति, तदा विदूषकः वत्सराजस्य वासवदत्तायाम् अभिलाषं कथयति।

( क्रमशः... )

## मासवार्त्ताः

### आरब्धः 'एकलव्य-संस्कृत-एकेडेमी, यु.के.-चेप्टर' प्रकल्पः ।










एकलव्य-संस्कृत-एकेडेमी संस्कृतभाषायाः प्रचाराय निरन्तरं प्रयत्नं करोति । एतस्मिन् एव उपक्रमे एकलव्य-संस्कृत-एकेडेमीसंस्थानेन यु.के.देशे संस्कृतभाषायाः प्रचाराय 'एकलव्य-संस्कृत-एकेडेमी, यु.के.-चेप्टर' इति कश्चन प्रकल्पः आरब्धः वर्तते । संस्थानस्य निदेशकः डॉ. मिहिरः उपाध्यायः, अध्यापिका डॉ. अमी उपाध्यायः च संस्कृतभाषायाः प्रचाराय जुलाईमासस्य ४ दिनाङ्कतः २७ दिनाङ्कपर्यन्तं यु.के.देशे विविधेषु स्थानेषु प्रवासम् अकुरुताम् । आयोजनेस्मिन् जुलाईमासस्य ५, ६, दिनाङ्कयोः लेस्टरनगरे शिवालयमन्दिरे शिवमहिम्नःस्तोत्रस्य कार्यशाला, ७ दिनाङ्के लेस्टरनगरे Radio Utsav, UK उपरि 'संस्कृतस्य महत्त्वम्' इति विषये कार्यक्रमः, ८ दिनाङ्के वोलसोलनगरे गृहसम्पर्ककार्यक्रमः, ९ दिनाङ्के वोलसोलनगरे राममन्दिरे 'संस्कृतस्य महत्त्वम्' इति विषये व्याख्यानम्, १३ दिनाङ्के लेस्टरनगरे Saorvalley college स्थाने 'Introducing Sanskrit & Garbain Sankrit' इति विषये व्याख्यानम्, १४ दिनाङ्के Watford नगरे 'Subhashit: Treasure of Sanskrit language' इति विषये व्याख्यानम्, १५, १६, १७ दिनाङ्केषु प्रातः अवन्तिविद्यालये बालसंस्कृतगर्गाः, मध्याह्ने Watford नगरे श्रीमद्भगवद्गीतावर्गाः, सायं Watford नगरे St. Meryl विद्यालये शिवमहिम्नःस्तोत्रवर्गः च, १८, १९ दिनाङ्कयोः St. Meryl विद्यालये बालसंस्कृतवर्गः संस्कृतभाषाशिक्षणवर्गः च, २० दिनाङ्के नोर्थलंडननगरे 'Role of Learning Sanskrit in Current Era' इति विषये व्याख्यानम्, २५ दिनाङ्के Muswell Hill नगरे 'Subhashit: Treasure of Sanskrit language' इति विषये व्याख्यानम्, २६, २७ दिनाङ्कयोः प्रातः नोर्थलंडननगरे 'शिवमहिम्नःसोत्रवर्गः', सायं Stanmore नगरे स्वामीनारायणमन्दिरे 'Influence & Need of Sanskrit in our lives' 'शिवमहिम्नःस्तोत्रं' च इति विषये व्याख्यानं इत्येते कार्यक्रमाः सम्पन्नाः । अत्र उल्लेखनीयं यत् एतेषां सर्वेषां कार्यक्रमाणाम् आयोजनं श्रीनीरवः पण्ड्यामहोदयः अकरोत् । सर्वेषु कार्यक्रमेषु जनाः सोत्साहं भागम् आवहन् ।

## कृपया हसन्तु

**नमनः** - (रमणम् उद्दिश्य) भोः भ्रातः कृपया मां ज्ञापय 'I am going' इत्यस्य कः अर्थः ?

**रमणः** - अहं गच्छामि ।

**नमनः** - भोः, अहं विंशतिजनान् अपृच्छम्, सर्वे गन्तुम् इच्छन्ति किन्तु उत्तरं कोऽपि न वदति ।

★ ★ ★ ★ ★

**प्रथमः चोरः** - आरक्षकाः त्वां किमर्थं गृहीतवन्तः ?

**द्वितीयः चोरः** - वित्तकोषे चोर्यं कृत्वा अहं तत्रैव उपविश्य धनगणनाम् आरब्धवान् अतः आरक्षकाः माम् अगृह्णन् ।

**प्रथमः चोरः** - किन्तु तदैव धनगणनायाः का आवश्यकता आसीत् ?

**द्वितीयः चोरः** - तत्र लिखितम् आसीत् यत् - धनदेयस्थानत्यागात् पूर्वं धनगणनाम् अवश्यं कुर्वन्तु, अनन्तरं वित्तकोषस्य दायित्वं नास्ति ।

★ ★ ★ ★ ★

**भिक्षुकः** - (वृद्धाम् उद्दिश्य) भोः मातः, ईश्वरस्य नाम्ना किमपि ददातु, सप्ताहात् किमपि न खादितवान् अहम् ।

**वृद्धा** - (५०० रूप्यकाणि दर्शयन्ती) ४०० रूप्यकाणां परिवर्तः अस्ति ?

**भिक्षुकः** - आम्, अस्ति ।

**वृद्धा** - तर्हि तस्मात् एव किमपि क्रीत्वा खादतु वत्स !

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**विद्या ददाति विनयं विनयाद्याति पात्रताम् ।**
**पात्रत्वाद् धनमाप्नोति धनाद्धर्मस्ततः सुखम् ॥**

**तात्पर्यम्** – विद्यया विनयः, विनयेन योग्यता, योग्यतया धनं, धनेन धर्मः, धर्मेण च सुखं प्राप्यते।

**विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।**
**शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥**

**तात्पर्यम्** – विद्याविनयसम्पन्नयुक्ते ब्राह्मणे, गजे, शुनके, चाण्डाले च पण्डिताः कमपि भेदं न गणयन्ति।

**विनाप्यर्थैर्वीरः स्पृशति बहुमानोन्नतिपदम्**
**समायुक्तोऽप्यर्थैः परिभवपदं याति कृपणः ।**
**स्वभावादुद्भूता गुणसमुदयावाप्तिविषया**
**द्युतिं सैंहीं किं श्वा धृतकनकमालोऽपि लभते ॥**

**तात्पर्यम्** – धनविहीनः अपि वीरः औन्नत्यं प्राप्नोति। सकलसम्पदा सहितः अपि कृपणः अवनतिं याति। उन्नतिः अवनतिश्च स्वभावात् प्राप्यते, उत्तमगुणेन च सम्पाद्यते। यथा शुनकः कनकमालां धरति चेत् सः मृगराजस्य सिंहस्य स्थानं प्राप्तुं न शक्नोति।

## ज्ञानसरित्

श्यामः पटेलः

**त्वगिन्द्रियम्** – मनुष्यशरीरे हृदयं फुफ्फुसद्वयं वृक्कौ चादयः अवयवाः स्वे स्वे तन्त्रे स्थिताः परस्परं सामञ्जस्यं विधाय कर्मणि रताः भवन्ति। यथा एते अवयवाः शरीरस्य अन्तर्भागे भवन्ति तथैव बहिर्भागे भवति – त्वक्। त्वक् शरीरस्य बाह्यावरणम् अस्ति। किन्तु शरीरस्थाः अवयवाः यथा कार्यं कुर्वन्ति तथैव त्वक् आन्तरिकावयवरूपेण अपि कार्यं करोति। त्वचः त्रयः स्तराः भवन्ति। एतेषु स्तरेषु यः बाह्यः स्तरः अस्ति तस्मिन् 'केरोटिनोसाइट्स' नामकाः कोशाः भवन्ति। एतत् आवरणं लोमानि केशान् नखान् मृतकोशान् च बहिः गमयति। आवरणमिदं किञ्चित् स्थूलं भवति। अतः शरीरं बहिः रक्षति। त्वचः द्वितीये स्तरे रक्तवाहिन्यः ज्ञानतन्तवश्च भवन्ति। एतत् आवरणम् अस्मान् शैत्यस्य घर्मस्य स्पर्शस्य च ज्ञानं कारयति। आवरणेऽस्मिन् प्रस्वेदग्रन्थयः प्रस्वेदं जनयित्वा शरीरस्य तापमानं सन्तुलितं कुर्वन्ति। अस्माकं हस्तपादादीनाम् अङ्गानां यथोचितं व्यवहारः भवेत् तथा प्रत्यास्था भवति त्वक्। त्वचः एक-स्क्वेर-इञ्चमिते भागे याः रक्तवाहिन्यः सन्ति तासां दैर्घ्यं पञ्चविंशति-फीट-मितं भवति। सम्पूर्णे शरीरे त्वगेव बृहत्तमम् अङ्गम् अस्ति। प्रौढमनुष्यस्य त्वक् विंशतिस्क्वेर-फीटमितं भवति। त्वचि स्थितं 'मेलानीन' नामकं द्रव्यं त्वचे वर्णं ददाति। तथा च अल्ट्रावायोलेट-किरणेभ्यः रक्षति। यत्र सूर्यप्रकाशः अधिकः भवति तत्रत्येषु जनेषु 'मेलानीन' द्रव्यम् अपि अधिकं भवति। तेन कारणेन तेषां त्वचः वर्णः कृष्णः भवति। प्रत्युत शीतप्रदेशेषु जनानां वर्णः धवलः भवति।

वृक्कौ – Pair of Kidneys, प्रत्यास्था – Elastic

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **कृतान्तः** | भाग्य | fate |
| **क्लिष्टः** | दुःखित | afflicted |
| **गर्हितः** | निन्दित | despised |
| **खेदः** | श्रान्ति | lassitude |
| **उद्घातः** | आरम्भ | beginning |
| **प्रतिहारः** | द्वारपाल | doorkeeper |
| **मन्युः** | शोक | lamentation |
| **वनौकस्** | वानर | monkey |
| **अप्रमितः** | अपरिमित | unlimited |
| **कूटयुद्धम्** | गुप्त युद्ध | secret war |
| **मौहूर्तिकः** | क्षणिक | momentary |
| **प्रेक्षणकम्** | दिखावा | show |
| **प्रेक्षा** | दृष्टि डालना | seeing |
| **कर्मदुष्टः** | दुराचारी | immoral |
| **उद्भ्रमः** | चक्कर देना | intoxication |

## किं भवन्तः जानन्ति ?

**१) श्रीकृष्णः कस्य पक्षिणः पिच्छं स्वमुकुटे स्थापयति स्म।**
(क) कोकिलस्य (ख) मयूरस्य (ग) शुकस्य (घ) हंसस्य

**२) एतेषु कः पक्षी लक्ष्म्याः वाहनं वर्तते ?**
(क) हंसः (ख) मयूरः (ग) उलूकः (घ) पीकः

**३) एतेषु कः खगः सरस्वत्याः वाहनं वर्तते ?**
(क) हंसः (ख) वेनतेयः (ग) कपोतः (घ) शुकः

**४) कामदेवस्य वाहनं कः खगः वर्तते ?**
(क) मयूरः (ख) शुकः (ग) हंसः (घ) वेनतेयः

**५) एतेषु कः गणेशस्य वाहनम् अस्ति ?**
(क) नकुलः (ख) वानरः (ग) मूषकः (घ) सिंहः

**६) एतेषु कः पक्षी नीरक्षीरविवेकं जानाति ?**
(क) शुकः (ख) मयूरः (ग) हंसः (घ) चटका

**७) सिंहः कस्याः देव्याः वाहनं वर्तते ?**
(क) सरस्वत्याः (ख) लक्ष्म्याः (ग) दुर्गायाः (घ) पार्वत्याः

उत्तराणि – (१) ख (२) ग (३) क (४) ख (५) ग (६) ग (७) ग

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## संस्कृतभाषाशिक्षणम्

### First Level

**Date :** 11/08/2025 to 10/11/2025
**Day :** Mon-Wed-Fri
**Time :** 7:00 am to 8:30 am (IST)
**Fees :** 7000/-

### Third Level

**Date :** 04/08/2025 to 10/11/2025
**Day :** Mon-Wed-Fri
**Time :** 6:30 pm to 8:00 pm (IST)
**Fees :** 7000/-

**Contact :** Dr. Mihir Upadhyay - (91) 098246 16237

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

- શું તમે સંસ્કૃત બોલવા ઈચ્છો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા ઈચ્છો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા ઈચ્છો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકિર્દી બનાવવા ઈચ્છો છો ?

તો અહીં છે, એક તક એકલવ્ય સંસ્કૃત એકેડેમી દ્વારા આયોજિત

## "Diploma In Sanskrit Teaching"

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી** માન્ય કોર્ષમાં
ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

**અભ્યાસક્રમની વિશેષતા :**

→ તાલીમ માટેનું ગુણવત્તાયુકત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવી શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરોઃ ડો. મિહિર ઉપાધ્યાય **9824616237**

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | | |
|---|---|---|
| वार्षिकं | रू | - 100 |
| द्वैवार्षिकं | रू | - 175 |
| त्रैवार्षिकं | रू | - 250 |
| अङ्कमूल्यं | रू | - 10 |

**प्रियवाचकाः**
- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006